শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী নারাযণদাসেন কৃতম্

# ॥ শ্রীরঙ্গরামানুজমহাদেশিক (শ্রীমুষ্ণম্ আণ্ডব়ন্) মঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরঙ্গরামানুজমহাদেশিক (শ্রীমুষ্ণম্ আণ্ডৱন্) মঙ্গলম্ ॥

শ্রীমুষ্ণাভিজনার্যায রঙ্গলক্ষ্মণযোগিনে।
আশ্রিতাৱনদীক্ষায নিত্যং ভৱতু মঙ্গলম্॥ **1** ॥

ত্রয্যন্তলক্ষ্মণমুনেঃ প্রাপ্তত্রয্যন্তসম্পদে।
রঙ্গলক্ষ্মণযোগীন্দ্রগুরুৱর্যায মঙ্গলম্॥ **2** ॥

নানাতন্ত্রস্বতন্ত্রায নানাতত্ত্বার্থৱেদিনে।
নানাভক্তসুসেৱ্যায তস্মৈ প্রাজ্ঞায মঙ্গলম্॥ **3** ॥

অগস্ত্যভাষাসক্তায তদ্ভাষাগ্রন্থশোধনে।
সমর্পিতস্বজীৱায গুরুৱর্যায মঙ্গলম্॥ **4** ॥

বহুভাষাপ্রৱীণায তৎসমন্ৱযকারিণে।
সদ্গুণগ্রাহিণে তস্মৈ মুনযে ভৱতু মঙ্গলম্॥ **5** ॥

কুরুকেশমুনেস্সূক্তৌ দ্রামিডীপাশুরেষু চ।
কৃতভূরিশ্রমাযাস্তু যতিরাজায মঙ্গলম্॥ **6** ॥

ভগৱদ্ভাষ্যকৃৎসূক্তিষ্ৱৱগাহিতধীমতে।
তৎপাদাম্বুজরক্তায যোগিৱর্যায মঙ্গলম্॥ **7** ॥

ৱেদান্তদেশিকগ্রন্থসারসারজ্ঞসেৱিনে।
তদ্ভক্তভক্তভক্তেষু স্ৱনুরক্তায মঙ্গলম্॥ **8** ॥

সাম্প্রদাযিকশাস্ত্রীযগ্রন্থেষু ৱিপুলা রতিঃ।
শ্লাঘনীযা মতির্যস্য তস্মৈ ভৱ্যায মঙ্গলম্॥ **9**॥

গুরুভক্তিপ্রপূর্ণায গুরুনামামৃতায চ।
প্রকাশকায যশসো হ্যাচার্যাযাস্তু মঙ্গলম্॥ **10**॥

দযা শিষ্যজনেষ্ৱেৱং ৱাৎসল্যমনুরাগতা।
সর্ৱেষু হিততা যস্য তস্মৈ সেৱ্যায মঙ্গলম্॥ **11**॥

অনুরাগো হি সর্ৱত্র মানৱত্ত্বং তথৈৱ চ।
দযাপূর্ণস্সদা যোঽসৌ গুরৱে ভৱতু মঙ্গলম্॥ **12**॥

ৱিদ্বৎসম্মাননং নূনমন্নদানঞ্চ সর্ৱদা।
দীনোপকারো যেন স্যাৎ তস্মৈ ভৱতু মঙ্গলম্॥ **13**॥

ৱেদঘোষো ব্রহ্মঘোষো ৱৈষ্ণৱানাং তথৈৱ চ।
শ্রীপাদুকাসুঘোষশ্চ যস্যৈতে তস্য মঙ্গলম্॥ **14**॥

মহাৱৈদ্যো মহাশিল্পী মহাগাযক এৱ চ।
জ্যোতিষ্কশ্চ মহাযোগী তস্মৈ শ্রেষ্ঠায মঙ্গলম্॥ **15**॥

সম্প্রদাযগতিশ্চাপি সম্প্রদাযৈকরক্ষকঃ।
শ্রীসূক্তিপোষকশ্চাসৌ তস্মৈ নিত্যায মঙ্গলম্॥ **16**॥

শ্রীশঠারির্যতীশানঃ শ্রীমদ্বেদান্তদেশিকঃ।
গোপালার্যগুরুর্ৱেতি তর্ক্যমানায মঙ্গলম্॥ **17**॥

শ্রীনারাযণদাসেন কৃতমাচার্যমঙ্গলম্।
যে পঠন্তি জনাস্তেষাং নিত্যং ভৱতু মঙ্গলম্॥ **18**॥

॥ ইতি শ্রীরঙ্গরামানুজমহাদেশিক মঙ্গলং সমাপ্তম্॥